International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 137-139
© 2026 IJMH
www.themultijournal.com
Received: 26-05-2026
Accepted: 19-06-2026
Publish : 22-06-2026

**डॉ. रश्मिताजेना**
अतिथि अध्यापिकाः,
स्नातकोत्तरन्यायदर्शनविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी

**Correspondence:**
**डॉ. रश्मिताजेना**
अतिथि अध्यापिकाः,
स्नातकोत्तरन्यायदर्शनविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी

# मुक्तावलीदिशा आत्मविषयकबौद्धमतनिरसनम्

**डॉ. रश्मिताजेना**

ज्ञानाधिकरणमात्मा[1]। ज्ञानं समवायसम्बन्धेन आत्मनि तिष्ठति । ज्ञानाश्रयत्वमात्मनो लक्षणम्[2]। कारिकावल्यनुसारं आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्[3]। अतति गच्छतीति आत्मा। स च सर्वदेहव्यापी अर्थात् जीवात्मपरमात्मभेदेन द्विविधः । परमात्मा एक एव, जीवस्तु प्रतिशरीरं भिन्नः। तत्रेश्वरस्सर्वज्ञः इन्द्रियाणां शरीरस्य च अधिष्ठाता भवति आत्मा। अधिष्ठाता नामो स्वविषयक-ज्ञाननिष्ठजन्यतानिरुपितजनकताख्यपरम्परासम्बन्धेन इन्द्रियाणां ज्ञानवत्तासम्पादकः, अवच्छेदकताख्य-परम्परासम्बन्धेन च शरीरस्य ज्ञानवत्तासम्पादकः। इन्द्रियाद्यधिष्ठातृत्वम्, समवायेन ज्ञानाधिकरणत्वं वा आत्मनो लक्षणम्। कालादीनां कालिकादिसम्बन्धेन ज्ञानाधिकरणत्वात् तत्र अतिव्याप्तिवारणाय ज्ञाननिष्ठाधेयतायां समवायेन इति विशेषणम्। भूतकाले अतिव्याप्तिवारणाय ज्ञानमिति विशेषणमत्रोपात्तम् । लक्षणगतज्ञानपदं तु शब्देच्छादेः उपलक्षकमिति । अनुमानन्तु इदं भवति इन्द्रियाणि शरीरञ्च ज्ञात्राधिष्ठितम् अचेतनत्वे सति जनकत्वावच्छेदकत्वेतदन्यतरसम्बन्धेनात्मनिष्ठज्ञानविषयक-ज्ञानवत्वात्, आत्मवत् इति। शरीरेन्द्रियादिकमवच्छेदकं तथा आत्मा अवच्छेद्येति।

**शरीरस्य न चैतन्यं मृत्येषु व्यभिचारतः ।**
**तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः**[4] ॥

अनया कारिकया चार्वाकादिनाम् आत्माविषयकविप्रत्तिपत्तिः वर्तते। यद्यपि "अहं जाने अहं सुखी अर्थात् सुखवानहम् , दुःखवानहमिति" एवं प्रकारेण आत्मनः मानसप्रत्यक्षत्वं सर्वैः अङ्गीक्रियते, तर्हि आत्मा मानसप्रत्यक्षस्य विषयः। अतः आत्मनि स्वमानसप्रत्यक्षमेव प्रमाणम्। एवञ्च प्रत्यक्षप्रमाणेन आत्मनः सिद्धिः कथं भवतीति। तस्य सिद्ध्यर्थं अनुमानप्रमाणस्य नास्त्यावश्यकता । तत्रेदं समाधानम् यत् विप्रतिपन्नानां केषाश्चित् दार्शनिकानां मते अयं सिद्धान्तः विरुद्धः स्यात्। यतो हि शरीरात्मवादी चार्वाकाः यश्शरीरमेव आत्मेति स्वीकरोति, अपरे च इन्द्रियाण्येवात्मा, अन्ये च मन एवात्मा इति स्वीकुर्वन्ति ।

एवं प्रकारेण भिन्नभिन्नानां चार्वाकाणां प्रति, तथा क्षणिकविज्ञानमेवात्मा इति बौद्धानां प्रति, नित्यविज्ञानमेवात्मा इति अद्वैतवेदान्तिनां प्रति, सर्वप्रथममहं जाने इत्यादि प्रतीतिविषयः शरीरभिन्नात्मा इति वक्तुं न शक्यते, यतो हि उपर्युक्तवादीनां मते तु शरीरमेवात्मा इति । अतः शरीरभिन्नः आत्मा इत्यत्र प्रमाणान्तरस्य अनुमानस्य वा आवश्यकतेति। तत्र करणम् करण-मेवात्मनोमूलकारणं भवति। अत एव कारिकाकृता अभिप्रायः मूलकारिकायां करणं हि सकर्तृकमिति उक्तम् ।

योगाचारबौद्धाः क्षणिकविज्ञानवादी। क्षणिकविज्ञानवादियोगाचार्याणां मतानुसारस्य क्षणिकविज्ञानस्य ज्ञानत्वस्य प्रमेयत्वव्यापकतया सर्वस्यापि विज्ञानरूपत्वम्, तञ्च विज्ञानं क्षणिकम्, अतः क्षणिकविज्ञानमेवात्मेति क्षणिकविज्ञानवादिनो वदन्ति। तन्मते क्षणिकत्वं नाम द्वितीयक्षण-वृत्तिध्वंसप्रतियोगित्वम्। तद्विज्ञानं द्विविधम् –प्रवृत्तिविज्ञानमालयविज्ञानञ्चेति। प्रवृत्तिविज्ञानं तु अयं घटः इति सविषयकज्ञानम्। तञ्च जाग्रति स्वप्नेऽर्धसुषुप्तौ च वर्तते । आलयविज्ञानं निर्विषयकविज्ञानम्, तञ्च गाढसुषुप्तौ वर्तते। अतो न मरण प्रसङ्गः सुषुप्तस्य पूर्वपूर्वविज्ञानेन उत्तरोत्तरविज्ञानधाराप्रवाहोऽखण्डं क्षणिकविज्ञानं वहतीति, स च पदार्थः सार्वादिकः क्षणिकविज्ञानात्मकः आत्मेति बौद्धाः सङ्गीरन्ते।

क्षणिकविज्ञानं नाम प्रवृत्यालयेति उभयविधविज्ञानमपि आत्मा भवतु इत्यर्थः । यद्यपि एतन्मते विज्ञानं सर्वमिति वक्तुमुचितम् । तथापि आत्मनिरूपणस्य विज्ञानमात्मा इति युक्तिं क्षणिकविज्ञानवादी प्रस्तुतवान् । तद्विज्ञानं भावरूपात् क्षणिकमिति । पूर्वपूर्वविज्ञानम् उत्तरोत्तरविज्ञानं प्रति कारणमिति। अतः सुषुप्त्यवस्थायाम् आलय-विज्ञानस्य धारा प्रचलति। अस्मात् कारणात् नात्र स्मरणा-नुपपत्तिर्दोषः । अत्रायमभिप्रायः – अस्मिन् संसारे सर्वे पदार्थाः न सन्तीति भावः । यतो हि यत्र यत्र प्रमेयत्वं तत्र तत्र ज्ञानत्वमिति । अर्थात् ज्ञानत्वं प्रमेयत्वस्य व्यापकत्वात् सर्वं विज्ञानमेव ।

इदं विज्ञानं द्विविधम्। प्रवृत्तिविज्ञानमालयविज्ञानञ्चेति। प्रवृत्तिविज्ञानं तु अयं घटः अयं पटः इत्यादि बाह्यपदार्थानां ज्ञानम् अर्थात् सविषयकविज्ञानमेव । तच्च जाग्रति स्वप्नेऽर्धसुषुप्तौ च वर्तते। तथा अहम् अहमिति आलयविज्ञानं निर्विषयकविज्ञानम्, तच्च गाढसुषुप्तौ वर्तते । आलयप्रवृत्तिरूपोभयविधविज्ञानमेव आत्मा इति । अत्र पुनरियं शङ्का जायते यत् बुद्धेः नामान्तरं विज्ञानमिति । अतः किमर्थं तस्य चेतनत्वम्। यतो हि बुद्धिः जडैव। तत्र चेतनत्वस्य असम्भवात्। अतः विज्ञानं न आत्मा इति। पुनश्च आत्मा ज्ञानाधिकरणम् । किन्तु ज्ञानस्य ज्ञानान्तरं प्रति न आधारत्वम् । अतः ज्ञानाधिकरणा-त्मकचैतन्यविज्ञानस्य कथमुपपत्तिः ।

अत्रेदं समाधीयते यत् क्षणिकविज्ञानवादिनां मते स्वपरव्यवहारेण उभयविज्ञानं नाम आत्मा स्वयं प्रकाशः इति । यतो हि तस्य विज्ञानस्य स्वाऽभिन्नज्ञानविषयता तस्मिन्नेवाऽस्ति । अतः तत्र जडता नास्ति । अपि तु तत्र चेतनत्वमस्ति ।अतः तस्य ज्ञानस्य स एव कर्ता इति । पुनरत्रेऽयं शङ्का जायते यत् यदि क्षणिकविज्ञानरूपमेव आत्मा इति कथ्यते , तर्हि तत्र सुखदुःखादीनां समवायिकारणत्वं न स्यात् । परन्तु यदि ज्ञानोत्पत्तिक्षणे सुखादिनामुपपत्तिर्भवति, तर्हि सुखादीनामु-त्पत्तेर्पूर्वं विज्ञानस्य स्थितेः अवृत्तित्वात् न तत्र कारणता इति । यदि द्वितीयक्षणे सुखादीनामुत्पत्तिर्भवति , तर्हि तस्मिन् समये ज्ञानस्य नाशात् तत्र समवायिकारणता भवितुमर्हति। कार्यकालसमये समवायिकारणस्य वृत्तित्वमेव हेतुरिति कथ्यते। अतः क्षणिकविज्ञा-नमेव आत्मा इति कथम् ?

अत्रेदं समाधीयते यत् “अहं जानामि”, “अहं सुखी” इत्यादि अनेकाकारविज्ञानमेव ज्ञानं सुखादीनामाकारे भासितं भवति । यद्यपि विज्ञानमेव निर्विशेषम्, तथापि संवृत्तिकारणात् तत्र तादृशविज्ञानमेव तस्य विशिष्टाकारभासितं भवति । तदभिन्नत्वे सत्यपि तदभिन्नत्वेन भासमानत्वमिति । एवञ्च ज्ञानसुखादिपदार्थानामात्मनोऽभिन्नत्वात् तेषु कार्यकारणभावस्य अप्रसक्तिः ।

ज्ञानसुखदुःखादयः सर्वेऽपि आत्मवृत्तिगुणाः। तथा क्षणिकविज्ञान-रूपात्मनः अपि आकारः अस्ति यथा नैयायिकानां मते घटविषयकज्ञानस्य आकारः अयं घटः इति तथैव सुखदुःखादयोऽपि विज्ञानस्य आकारभूताः भवन्ति । पुनरत्रोऽयं शङ्का जायते यत् यदि ज्ञानसुखादयः आत्मनः आकारविशेषाः भवति तर्हि बौद्धानां मते आत्मनि विकारप्राप्तत्वात् आत्मनः अनित्यत्वं स्यादिदिति ।

अत्रेदं समाधीयते यत् सत् तत् क्षणिकमिति नियमः । तदनुसारेणेदं अयं विज्ञानमपि भावरूपत्वात् क्षणिकमिति । बौद्धमतानुसारं क्षणिकं नाम द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वमिति । अर्थात् प्रतिक्षणे एकमेकं विज्ञानं विज्ञानमुत्पद्यते ,द्वितीयक्षणे तस्य विनाशः भवति । एवमेव पूर्वपूर्वविज्ञानस्य उत्तरोत्तरविज्ञानोत्पत्तिद्वारेण अखण्डधारा प्रचलति । एवञ्च पूर्वक्षणे उत्पन्नं विज्ञानं द्वितीयक्षणे द्वितीयविज्ञानमुत्पाद्य स्वयं स्वस्य विनाशं करोति । अतः पूर्वपूर्वविज्ञानं प्रति उत्तरोत्तरविज्ञानस्य कारणता भवति , येन तत्र कार्यकारणभावः सम्भवति । एवञ्च क्षणिकविज्ञानस्य भावपदार्थत्वात् तत्र क्षणिकत्वं तथा अनित्यत्वमपि बौद्धाः स्वीकुर्वन्ति। अत्र इयं शङ्का जायते यत् पूर्वोत्पत्तिविज्ञानस्य विनाशः भवति, यतो हि बौद्धः तस्य भावपदार्थत्वात् क्षणिकमिति मन्यते । तदा विज्ञानान्तरस्य उत्पादकत्वाभावात् सुषुप्त्यवस्थायाम् आत्मा नास्तीति बौद्धाःस्वीकुर्युः । अस्मिन् स्थितौ किमपि अन्तरं न भवितुमर्हति ।

अत्रेदं समाधीयते यत् सुषुप्त्यवस्थायाम् आलयविज्ञानस्य धारा प्रचलति। अतः सुषुप्तौ न मृतः। अतः सुषुप्तिकालेऽपि विज्ञानरूपात्मनः अस्य अस्तित्वसिद्धिः भवति। अर्थात् क्षणिकविज्ञानमेवात्मेति। अत्र इदमेव तु नैसर्गिकं तात्पर्यमस्ति यत् बौद्धानां मते कार्यकारण-सामानाधिकरण्यमिति नियमो नास्ति। बौद्धसिद्धान्ते कारणत्वं तु कार्यपूर्ववृत्तित्वमात्रम्। अतः पूर्वं पूर्वं विज्ञानम् तदुत्तरवर्ति अव्य-वहितोत्तरज्ञानं प्रति कारणम्। अतः सुषुप्त्यवस्थारम्भे प्रवृत्तिविज्ञाने-स्योत्पत्तित्वात् अहमिति आलयविज्ञानस्य अखण्डधारा प्रचलति । अतः सुषुप्त्यवस्थायाम् आत्मा नास्तीति भवितुं नार्हति । परन्तु तस्मिन् समये तस्य अस्तित्वस्य विद्यमानत्वात्। अत्र पुनः शङ्का जायते यत् विज्ञानस्य क्षणिकत्वस्वीकारे तदाश्रितसंस्काराणामपि क्षणिकत्वं स्वीकर्तव्यमिति। तेन कालान्तरे तस्य स्मरणं न भवितुमर्हति ।

अत्रेदं समाधानं यत् विज्ञानं क्षणिकमिति । तस्य पूर्वक्षणे उत्पत्तिः द्वितीयक्षणे विनाशः इति । परन्तु स्वकीयं संस्कारः तत्रैव परित्यजति । तदेव संस्कारः पूर्वविज्ञानस्य द्वितीयक्षणे भाविविज्ञानाश्रयो भवतीति। दृष्टान्तद्वारेण मृगस्य मदः कस्तुरी, तस्य वासना सुगन्धः , तेन वासितं सुगन्धितं वसनं तेन युक्तः पटः येन पटेन सह योगं लभते तस्मिन्नपि पटे कस्तुरिकासुगन्धः संचरति । एवञ्च तत् पटात् संयुक्ते पटान्तरे, पटान्तरञ्च संयुक्तेऽन्यपटे संचरति , तद्वत् पूर्वपूर्वविज्ञानजनिताः संस्काराः उत्तरोत्तरविज्ञाने संक्राताः भवन्ति, अतः कालान्तरे तेषां स्मरणं निराबाधमिति । अर्थात् चार्वाकमतानुसारेण इन्द्रियप्राण-मनसादिषु आत्मत्वस्वीकारे स्मरणं न भवितुमर्हति। येन स्मरणा-नुपपत्तिर्दोषः । अतः सर्वैस्सर्वदादिक् क्षणिकविज्ञानमेव आत्मा तथा स कर्तृपदार्थोऽपि भवतीति ।

अत्र योगाचारबौद्धानां मतं खण्डयति नैयायिकः। प्रश्नस्तु बौद्धानां मते विज्ञानरूपात्मा सर्वं जगद्विषयत्वं किञ्चिदेकविषयकत्वं वेति । यदि संपूर्णं जगद्विषयको भवति , तर्हि सर्वेषां मनुष्याणां कथं सर्वत्र

इति वक्तुं न शक्यते । परन्तु कोऽपि मनुष्यः सर्वज्ञः इति तु न भवत्येव। यदि इदानीं द्वितीयपक्षदृष्ट्या विचार्यते यत् विज्ञानं केवलं यत्किञ्चित् अर्थात् घटपटादिषु कोऽपि एको विषयो भवति । अर्थात् यत्कश्चिद् पदार्थविषयको विज्ञानं भवति, तर्हि अत्र विनिगमनाविरहः। यतो हि बौद्धानां मतानुसारं बाह्यपदार्थः कोऽपि नास्ति, तथा घटपटादिविषयकज्ञानमपि किमपि तत्र न भवितुमर्हति। बाह्यपदार्थानामस्तित्वे अकारणत्वात् सर्वेषां पदार्थानां ज्ञानविषयत्वं भवति । एकस्मिन् विषये भवतु इति का निर्णायकयुक्तिः बौद्धानाम् ? बाह्यपदार्थः न भवति चेत् तर्हि एकस्मिन् विषये विशेषपदार्थानुभवः कथं सम्भवतीति ।

विज्ञानवादस्वीकारे कारणान्तरमपि विद्यते। बौद्धमतानुसारेण सुषुप्त्यवस्थायामपि आलयविज्ञानं तिष्ठति । अतस्तत्र विषयस्य स्फुरणं भवति। यतो हि ज्ञानं सविषयकम् । परन्तु सुषुप्त्यवस्थायां किमपि घटपटादीनां बाह्यपदार्थानां सविषयकं ज्ञानं न भवति। एतस्यामवस्थायां तु केवलमहमिति ज्ञानस्य धारा प्रचलति । तदेव आलयविज्ञानमिति । ज्ञानं न निर्विषयकमिति नियमः । तदा तस्मिन् समये किमर्थं घटपटादीनां बाह्यविषयज्ञानं न भवति। अतः विज्ञानवादस्य निरसनमिति ।

एवं प्रकारेण नैयायिकानां मते शरीरेन्द्रियमनक्षणिकविज्ञाननित्यविज्ञानरूपः न स्यात्, स तु स्वतन्त्रः इति। स तु सुखवानहं, दुःखवानहं, ज्ञानवानहम् इत्यादीनां प्रतीतिविषयः इति। एवञ्च सुखादिनिष्ठप्रकारतानिरूपित-अहन्त्वावच्छिन्नविशेष्यतावान् चेतनात्मा एव इति प्रत्यक्षप्रमाणेन सिद्धिः भवितुं नार्हति । सुखवानहमिति प्रतीतिः यद्यपि सर्वैः अनुभूयते। तथापि चार्वाकमते अहन्त्वावच्छिन्नविशेष्यता शरीरे एव। अन्ये तु इन्द्रिये मनसि च । बौद्धानामनुसारेण क्षणिकविज्ञाने, तथा वेदान्तिनां मते नित्यविज्ञाने एव आत्मतन्नान्यतेति निगदन्ति। परन्तु आत्मा सर्वेभ्यः स्वतन्त्रः इति प्रमाणीकर्तुम् अनुमान-स्यावश्यकतास्ति ।

**सहायकग्रन्थसूची**


१.कारिकावली- श्रीविश्वनाथपञ्चाननभट्टाचार्यः, चौखम्बासंस्कृत-संस्थान, वाराणसी , वि.सं.- २०३८।

२.तर्कसंग्रहः - श्रीअन्नंभट्टः, श्रीसत्कारिशर्मा, चौखम्भा संस्कृत संस्थानम्, वाराणसी ।

३.तर्कभाषा - -केशवमिश्रप्रणीतः डॉ. गजाननशास्त्रीमुसलगॉवकर, सुरभारतीप्रकाशन , वाराणसी ।

४.न्यासिद्धान्तमुक्तावली - श्रीकृष्णवल्लभाचार्यकृतः, चौखम्भा संस्कृत संस्थानम्, नई दिल्ली, 110002

५.बालव्युत्पत्तिः- डॉ. विश्वनाथधितालः, संस्कृतिप्रकाशनम्, वाराणसी।


**पाद टिप्पणी**

[1] तर्कसंग्रहः –पृ -१९

[2] बालव्युत्पत्तिः – पृ -४

[3]कारिकावली – पृ-१५६

[4] कारिकावली – पृ -१६१